## नित्यं क्रीडाजीविकयोः । (१७/७११)

न इति निवृत्तम्, [1]न तृजकौ । [2]नित्यं समासो विधीयते । क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समासो भवति । तृच् क्रीडाजीविकयोर्नास्ति [3]इत्यक एवोदाह्रियते । उद्दालकपुष्पभञ्जिका (३.३.१०९/३२८६)[4] । [5]वारणपुष्पप्रचायिका । जीविकायाम् – दन्तलेखकः । नखलेखकः । क्रीडाजीविकयोः इति किम्? ओदनस्य भोजकः[6] ॥

## कुगतिप्रादयः । (१८/७६१)

नित्यम् इति [7]वर्तते । कुशब्दोऽव्ययं गृह्यते गत्यादिसाहचर्यात्, न द्रव्यवचनः । कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति । कुः पापार्थे (म.भा. १.४१६)—कुपुरुषः । गति – [8]उररीकृतम् । [9]यदूरीकरोति । प्रादयः — दुर्निन्दायाम् (म.भा. १.४१६) – दुष्पुरुषः । स्वती पूजायाम् (म. भा. १.४१६) – सुपुरुषः । अतिपुरुषः । [10]आङ ईषदर्थे (म.भा. १.४१६) – आपिङ्गलः । प्रायिकं चैतदु[11]पाधिवचनम् । अन्यत्रापि हि समासो दृश्यते । कोष्णम् (६.३.१०५/१०३१) । कदुष्णम् (६.३.१०१/१०२७) । [12]कवोष्णम् (६.३.१०७/१०३३) । दुष्कृतम् । [13]अतिस्तुतम् । आबद्धम् इति ।

[९०] प्रादयो [14]गताद्यर्थे प्रथमया । (म.भा. १.४१६)

प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी ।

[९१] अत्यादयः क्रान्ताद्यर्थे द्वितीयया । (म.भा. १.४१६)

अतिक्रान्तः खट्वाम् अतिखट्वः । अतिमालः ।

[९२] अवादयः क्रुष्टाद्यर्थे तृतीयया । (म.भा. १.४१६)

अवक्रुष्टः कोकिलया अवकोकिलः[15] ।

[९३] पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । (म.भा. १.४१६)

परिग्लानोऽध्ययनाय पर्यध्ययनः । अलं कुमार्यै अलंकुमारिः ।

[९४] निरादयः क्रान्ताद्यर्थे पञ्चम्या । (म.भा. १.४१६)

निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । निर्वाराणसिः ।

[९५] इवेन [16]सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् । (म.भा. १.४१६)

वा॑ससी इव । व॒स्त्रे॑ इव[17] ।

[९६] प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः । (म.भा. १.४१६)

वृक्षं प्रति विद्योतते [18]विद्युत् । साधुर्देवदत्तो मातरं प्रति ॥

---

1. न तृजकौ नास्ति क.ड.इ.फ.ह, तेन इत्यधिकम् ब. 2. नित्यसमासो ड.फ. 3. इत्यत एव ह. 4. नित्यसमासत्वादस्वपदविग्रहः इत्यधिकम् अ.क. 5. बाण° क.ड, वरणपुष्पचायिका ब. 6. नित्यग्रहणमुत्तरार्थम् इत्यधिकम् ह. 7. अनुवर्तते ड. 8. उररीकृत्य, ऊरीकृत्य ड.ह.फ. 9. नास्ति क.फ. 10. आङ ईषदर्थे नास्ति फ. 11. उपाधेर्वचनम् ग. 12. नास्ति फ. 13. सुष्टुतम् क.ग.फ. 14. गतात्यर्थे फ. 15. वसन्तः इत्यधिकम् क.ड. 16. सह समासः नास्ति ड.फ.ह. 17. कन्येव इत्यधिकम् ह. 18. विद्युत् नास्ति फ.